# shrIshivakeshAdipAdAntavarNanastotram

# શ્રીશિવકેશાદિપાદાન્તવર્ણનસ્તોત્રમ્

## Document Information

Text title : shivakeshAdipAdAntavarNanastotram

File name : shivakeshAdipAdAntavarNanastotram.itx

Category : shiva, shankarAchArya

Location : doc_shiva

Author : Shankaracharya

Transliterated by : Rajnarayanan C K krajnara at gmail.com

Proofread by : Rajnarayanan C K, PSA Easwaran

Description-comments : Brihatstotraratnakara

Latest update : January 16, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

shrIshivakeshAdipAdAntavarNanastotram

# શ્રીશિવકેશાદિપાદાન્તવર્ણનસ્તોત્રમ્

દેયાસુર્મૂર્ધ્નિ રાજત્સરસસુરસરિત્પારપર્યન્તનિર્ય-
ત્પ્રાંશુસ્તમ્બાઃ પિશઙ્ગાસ્તુલિતપરિણતારક્તશાલીલતા વઃ ।
દુર્વારાપત્તિગર્તશ્રિતનિખિલજનોત્તારણે રજ્જુભૂતા
ઘોરાઘોર્વીરુહાલીદહનશિખિશિખાઃ શર્મ શાર્વાઃ કપર્દાઃ ॥ ૧॥

કુર્વન્નિર્વાણમાર્ગપ્રગમપરિલસદ્રૂપ્યસોપાનશઙ્કાં
શક્રારીણાં પુરાણાં ત્રયવિજયકૃતસ્પષ્ટરેખાયમાણમ્ ।
અવ્યાદવ્યાજમુચ્ચૈરલિકહિમધરાધિત્યકાન્તસ્ત્રિધોદ્ય-
જ્જાહ્નવ્યાભં મૃડાનીકમિતુરુડુપરુક્પાણ્ડરં વસ્ત્રિપુણ્ડ્રમ્ ॥ ૨॥

ક્રુધ્યદ્ગૌરીપ્રસાદાનતિસમયપદાઙ્ગુષ્ઠસઙ્ક્રાન્તલાક્ષા-
બિન્દુસ્પર્ધિ સ્મરારેઃ સ્ફટિકમણિદૃષન્મગ્નમાણિક્યશોભમ્ ।
મૂર્ધ્ન્યુદ્યદ્દિવ્યસિન્ધોઃ પતિતશફરિકાકારિ વો માસ્તકં સ્તા-
દસ્તોકાપત્તિકૃત્યૈ હુતવહકણિકામોક્ષરૂક્ષં સદાક્ષિ ॥ ૩॥

ભૂત્યૈ દૃગ્ભૂતયોઃ સ્યાદ્યદહિમહિમરુગ્બિમ્બયોઃ સ્નિગ્ધવર્ણો
દૈત્યૌઘધ્વંસશંસી સ્ફુટ ઇવ પરિવેષાવશેષો વિભાતિ ।
સર્ગસ્થિત્યન્તવૃત્તિર્મયિ સમુપગતેઽતીવ નિર્વૃત્તગર્વં
શર્વાણીભર્તુરુચ્ચૈર્યુગલમથ દધદ્વિભ્રમં તદ્ભ્રુવોર્વઃ ॥ ૪॥

યુગ્મે રુક્માબ્જપિઙ્ગે ગ્રહ ઇવ પિહિતે દ્રાગ્યયોઃ પ્રાગ્દુહિત્રા
શૈલસ્ય ધ્વાન્તનીલામ્બરરચિતબૃહત્કઞ્ચુકોઽભૂત્પ્રપઞ્ચઃ ।
તે ત્રૈનેત્રે પવિત્રે ત્રિદશવરઘટામિત્રજૈત્રોગ્રશસ્ત્રે
નેત્રે નેત્રે ભવેતાં દ્રુતમિહ ભવતામિન્દ્રિયાશ્વાન્નિયન્તુમ્ ॥ ૫॥

ચણ્ડીવક્ત્રાર્પણેચ્છોસ્તદનુ ભગવતઃ પાણ્ડુરુક્પાણ્ડુગણ્ડ-
પ્રોદ્યત્કણ્ડૂં વિનેતું વિતનુત ઇવ યે રત્નકોણૈર્વિઘૃષ્ટિમ્ ।
ચણ્ડાર્ચિર્મણ્ડલાભે સતતનતજનધ્વાન્તખણ્ડાતિશૌણ્ડે
ચાણ્ડીશે તે શ્રિયે સ્તામધિકમવનતાખણ્ડલે કુણ્ડલે વઃ ॥ ૬॥

ખટ્વાઙ્ગોદગ્રપાણેઃ સ્ફુટવિકટપુટો વક્ત્રરન્ધ્રપ્રવેશ-
પ્રેપ્સૂદઞ્ચત્ફણોરુશ્વસદતિધવલાહીન્દ્રશઙ્કાં દધાનઃ ।
યુષ્માકં કમ્રવક્ત્રામ્બુરુહપરિલસત્કર્ણિકાકારશોભઃ
શશ્વત્ત્રાણાય ભૂયાદલમતિવિમલોત્તુઙ્ગકોણઃ સ ઘોણઃ ॥ ૭॥

ક્રુધ્યત્યદ્ધા યયોઃ સ્વાં તનુમતિલસતોર્બિમ્બતાં લક્ષયન્તી
ભર્ત્રે સ્પર્ધાતિનિધ્ના મુહુરિતરવધૂશઙ્કયા શૈલકન્યા ।
યુષ્માંસ્તૌ શશ્વદુચ્ચૈરબહુલદશમીશર્વરીશાતિશુભ્રા-
વવ્યાસ્તાં દિવ્યસિન્ધોઃ કમિતુરવનમલ્લોકપાલૌ કપોલૌ ॥ ૮॥

યો ભાસા ભાત્યુપાન્તસ્થિત ઇવ નિભૃતં કૌસ્તુભો દ્રષ્ટુમિચ્છન્
સોત્થસ્નેહાન્નિતાન્તં ગલગતગરલં પત્યુરુચ્ચૈઃ પશૂનામ્ ।
પ્રોધન્પ્રેમ્ણા યમાર્દ્રા પિબતિ ગિરિસુતા સમ્પદઃ સાતિરેકા
લોકાશ્શોણીકૃતાન્તા યદધરમહસા સોઽધરો વો વિધત્તામ્ ॥ ૯॥

અત્યર્થં રાજતે યા વદનશશધરાદુદ્ગલચ્ચારુવાણી-
પીયૂષામ્ભઃપ્રવાહપ્રસરપરિલસત્ફેનબિન્દ્વાવલીવ ।
દેયાત્સા દન્તપઙ્ક્તિશ્ચિરમિહ દનુદાયાદદૌવારિકસ્ય
દ્યુત્યા દીપ્તેન્દુકુન્દચ્છવિરમલતરપ્રોન્નતાગ્રા મુદં વઃ ॥ ૧૦॥

ન્યક્કુર્વન્નુર્વરાભૃન્નિભઘનસમયોદ્ઘુષ્ટમેઘૌઘઘોષં
સ્ફૂર્જદ્વાર્ધ્યુત્થિતોરુધ્વનિતમપિ પરબ્રહ્મભૂતો ગભીરઃ ।
સુવ્યક્તો વ્યક્તમૂર્તેઃ પ્રકટિતકરણઃ પ્રાણનાથસ્ય સત્યાઃ
પ્રીત્યા વઃ સંવિદધ્યાત્ફલવિકલમલં જન્મ નાદઃ સ નાદઃ ॥ ૧૧॥

ભાસા યસ્ય ત્રિલોકી લસતિ પરિલસત્ફેનબિન્દ્વર્ણવાન્ત-
ર્વ્યામગ્નેવાતિગૌરસ્તુલિતસુરસરિદ્વારિપૂરપ્રસારઃ ।
પીનાત્મા દન્તભાભિર્ભૃશમહહહકારાતિભીમઃ સદેષ્ટાં
પુષ્ટાં તુષ્ટિં કૃષીષ્ટ સ્ફુટમિહ ભવતામટ્ટહાસોઽષ્ટમૂર્તેઃ ॥ ૧૨॥

સદ્યોજાતાખ્યમાપ્યં યદુવિમલમુદગ્વર્તિ યદ્વામદેવં
નામ્ના હેમ્ના સદૃક્ષં જલદનિભમઘોરાહ્વયં દક્ષિણં યત્ ।
યદ્બાલાર્કપ્રભં તત્પુરુષનિગદિતં પૂર્વમીશાનસંજ્ઞં
યદ્દિવ્યં તાનિ શમ્ભોર્ભવદભિલષિતં પઞ્ચ દદ્યુર્મુખાનિ ॥ ૧૩॥

આત્મપ્રેમ્ણો ભવાન્યા સ્વયમિવ રચિતાઃ સાદરં સાંવનન્યા

મષ્યા તિસ્રઃ સુનીલાઞ્જનનિભગરરેખાઃ સમાભાન્તિ યસ્યામ્ ।
આકલ્પાનલ્પભાસા ભૃશરુચિરતરા કમ્બુકલ્પામ્બિકાયાઃ
પત્યુઃ સાત્યન્તમન્તર્વિલસતુ સતતં મન્થરા કન્ધરા વઃ ॥ ૧૪॥

વક્ત્રેન્દોર્દન્તલક્ષ્મ્યાશ્ચિરમધરમહાકૌસ્તુભસ્યાપ્યુપાન્તે
સોત્થાનાં પ્રાર્થયન્ યઃ સ્થિતિમચલભુવે વારયન્ત્યૈ નિવેશમ્ ।
પ્રાયુઙ્ક્તેવાશિષો યઃ પ્રતિપદમમૃતત્વે સ્થિતઃ કાલશત્રોઃ
કાલં કુર્વન્ ગલં વો હૃદયમયમલં ક્ષાલયેત્ કાલકૂટઃ ॥ ૧૫॥

પ્રૌઢપ્રેમાકુલાયા દૃઢતરપરિરમ્ભેષુ પર્વેન્દુમુખ્યાઃ
પાર્વત્યાશ્ચારુચામીકરવલયપદૈરઙ્કિતં કાન્તિશાલિ ।
રઙ્ગન્નાગાઙ્ગદાઢ્યં સતતમવિહિતં કર્મ નિર્મૂલયેત્ત-
દ્દોર્મૂલં નિર્મલં યદ્ધૃદિ દુરિતમપાસ્યાર્જિતં ધૂર્જટેર્વઃ ॥ ૧૬॥

કણ્ઠાશ્લેષાર્થમાપ્તા દિવ ઇવ કમિતુઃ સ્વર્ગસિન્ધોઃ પ્રવાહાઃ
ક્રાન્ત્યૈ સંસારસિન્ધોઃ સ્ફટિકમણિમહાસઙ્ક્રમાકારદીર્ઘાઃ ।
તિર્યગ્વિષ્કમ્ભભૂતાસ્ત્રિભુવનવસતેર્ભિન્નદૈત્યેભદેહા
બાહા વસ્તા હરસ્ય દ્રુતમિહ નિવહાનંહસાં સંહરન્તુ ॥ ૧૭॥

વક્ષો દક્ષદ્વિષોઽલં સ્મરભરવિનમદ્દક્ષજાક્ષીણવક્ષો-
જાન્તર્નિક્ષિપ્તશુમ્ભન્મલયજમિલિતોદ્ભાસિ ભસ્મોક્ષિતં યત્ ।
ક્ષિપ્રં તદ્રૂક્ષચક્ષુઃ શ્રુતિગણફણરત્નૌઘભાભીક્ષ્ણશોભં
યુષ્માકં શશ્વદેનઃ સ્ફટિકમણિશિલામણ્ડલાભં ક્ષિણોતુ ॥ ૧૮॥

મુક્તામુક્તે વિચિત્રાકુલવલિલહરીજાલશાલિન્યવાઞ્ચ-
ન્નાભ્યાવર્તે વિલોલદ્ભુજગવરયુતે કાલશત્રોર્વિશાલે ।
યુષ્મચ્ચિત્તત્રિધામા પ્રતિનવરુચિરે મન્દિરે કાન્તિલક્ષ્મ્યાઃ
શેતાં શીતાંશુગૌરે ચિરતરમુદરક્ષીરસિન્ધૌ સલીલમ્ ॥ ૧૯॥

વૈયાઘ્રી યત્ર કૃત્તિઃ સ્ફુરતિ હિમગિરેર્વિસ્તૃતોપત્યકાન્તઃ
સાન્દ્રાવશ્યાયમિશ્રા પરિત ઇવ વૃતા નીલજીમૂતમાલા ।
આબદ્ધાહીન્દ્રકાઞ્ચીગુણમતિપૃથુલં શૈલજાક્રીડભૂમિ-
સ્તદ્વો નિઃશ્રેયસે સ્યાજ્જઘનમતિઘનં બાલશીતાંશુમૌલેઃ ॥ ૨૦॥

પુષ્ટાવષ્ટમ્ભભૂતૌ પૃથુતરજઘનસ્યાપિ નિત્યં ત્રિલોક્યાઃ
સમ્યગ્વૃત્તૌ સુરેન્દ્રદ્વિરદવરકરોદારકાન્તિં દધાનૌ ।
સારાવૂરૂ પુરારેઃ પ્રસભમરિઘટાઘસ્મરૌ ભસ્મશુભ્રૌ

ભક્તૈરત્યાર્દ્રચિત્તૈરધિકમવનતૌ વાઞ્છિતં વો વિધત્તામ્ ॥ ૨૧॥

આનન્દાયેન્દુકાન્તોપલરચિતસમુદ્ગાયિતે યે મુનીનાં
ચિત્તાદર્શં નિધાતું વિદધતિ ચરણે તાણ્ડવાકુઞ્ચનાનિ ।
કાઞ્ચી ભોગીન્દ્રમૂર્ધ્નાં પ્રતિમુહુરુપધાનાયમાને ક્ષણં તે
કાન્તે સ્તામન્તકારેર્દ્યુતિવિજિતસુધાભાનુની જાનુની વઃ ॥ ૨૨॥

મઞ્જીરીભૂતભોગિપ્રવરગણફણામણ્ડલાન્તર્નિતાન્ત-
વ્યાદીર્ઘાનર્ઘરત્નદ્યુતિકિસલયિતે સ્તૂયમાને દ્યુસદ્ભિઃ ।
બિભ્રત્યૌ વિભ્રમં વઃ સ્ફટિકમણિબૃહદ્દણ્ડવદ્ભાસિતે યે
જઙ્ઘે શઙ્ખેન્દુશુભ્રે ભૃશમિહ ભવતાં માનસે શૂલપાણેઃ ॥ ૨૩॥

અસ્તોકસ્તોમશસ્ત્રૈરપચિતિમમલાં ભૂરિભાવોપહારૈઃ
કુર્વદ્ભિસ્સર્વદોચ્ચૈઃ સતતમભિવૃતૌ બ્રહ્મવિદ્દેવલાદ્યૈઃ ।
સમ્યક્સમ્પૂજ્યમાનાવિહ હૃદિ સરસીવાનિશં યુષ્મદીયે
શર્વસ્ય ક્રીડતાં તૌ પ્રપદવરબૃહદ્કચ્છપાવચ્છભાસૌ ॥ ૨૪॥

યાઃ સ્વસ્યૈકાંશપાતાદતિબહુલગલદ્રક્તવક્ત્રં પ્રણુન્ન-
પ્રાણં પ્રાક્રોશયન્ પ્રાઙ્ નિજમચલવરં ચાલયન્તં દશાસ્યમ્ ।
પાદાઙ્ગુલ્યો દિશન્તુ દ્રુતમયુગદૃશઃ કલ્મષપ્લોષકલ્યાઃ
કલ્યાણં ફુલ્લમાલ્યપ્રકરવિલસિતા વઃ પ્રણદ્ધાહિવલ્લ્યઃ ॥ ૨૫॥

પ્રહ્વપ્રાચીનબર્હિઃ પ્રમુખસુરવરપ્રસ્ફુરન્મૌલિસક્ત-
જ્યાયોરત્નોત્કરોસ્રૈરવિરતમમલા ભૂરિનીરાજિતા યા ।
પ્રોદગ્રાગ્રા પ્રદેયાત્તતિરિવ રુચિરા તારકાણાં નિતાન્તં
નીલગ્રીવસ્ય પાદામ્બુરુહવિલસિતા સા નખાલી સુખં વઃ ॥ ૨૬॥

સત્યાઃ સત્યાનનેન્દાવપિ સવિધગતે યે વિકાસં દધાતે
સ્વાન્તે સ્વાં તે લભન્તે શ્રિયમિહ સરસીવામરા યે દધાનાઃ ।
લોલં લોલમ્બકાનાં કુલમિવ સુધિયાં સેવતે યે સદા સ્તાં
ભૂત્યૈ ભૂત્યૈણપાણેર્વિમલતરરુચસ્તે પદામ્ભોરુહે વઃ ॥ ૨૭॥

યેષાં રાગાદિદોષાક્ષતમતિ યતયો યાન્તિ મુક્તિં પ્રસાદા-
દ્યે વા નમ્રાત્મમૂર્તિર્દ્યુસદૃષિપરિષન્મૂર્ધ્નિ શેષાયમાણાઃ ।
શ્રીકણ્ઠસ્યારુણોદ્યચ્ચરણસરસિજપ્રાપ્તિતાસ્તે ભાવાખ્યા-
ત્પારાવારાચ્ચિરં વો દુરિતહતિકૃતસ્તારયેયુઃ પરાગાઃ ॥ ૨૮॥

ભૂમ્ના યસ્યાસ્તસીમ્ના ભુવનમનુસૃતં યત્પરં ધામ ધામ્નાં
સામ્નામામ્નાયતત્ત્વં યદપિ ચ પરમં યદ્ગુણાતીતમાદ્યમ્ ।
યચ્ચાંહોહન્નિરીહં ગહનમિતિ મુહુઃ પ્રાહુરુચ્ચૈર્મહાન્તૌ
માહેશં તન્મહો મે મહિતમહરહર્મોહરોહં નિહન્તુ ॥ ૨૯॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
શ્રીશિવકેશાદિપાદાન્તવર્ણનસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Rajnarayanan C K krajnara at gmail.com
Proofread by Rajnarayanan C K, PSA Easwaran

*shrIshivakeshAdipAdAntavarNanastotram*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*